"शिग्रुवल्कलपत्राणां सुरसः परमार्त्तिहृत्।
चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्।
अवृष्यं कफवातघ्नं तन्नस्येन शिरोऽर्त्तिनुत्॥"
इति भावप्रकाशः॥

श्वेतशिंशपा, स्त्री, (श्वेता शिंशपा।) शुक्लशिंशपावृक्षः। तत्पर्य्यायः। श्वेतपत्रा २ श्वेतचिल्लिका ३। अस्या गुणाः। तिक्तत्वम्। शिशिरत्वम्। पित्तदाहनाशित्वञ्च। इति राजनिर्घण्टः॥

श्वेतशृङ्गः, पुं, (श्वेता शृङ्गा यस्य।) यवः। इति जटाधरः॥ शुक्लशृङ्गायुक्ते, त्रि॥

श्वेतशूरणः, पुं, (श्वेतः शूरणः।) वनशूरणः। इति राजनिर्घण्टः॥

श्वेतसर्पः, पुं, वरुणवृक्षः। इति जटाधरः॥ (श्वेतः सर्पः।) शुक्लवर्णाहिश्च॥

श्वेतसारः, पुं, (श्वेतः सारो यस्य।) खदिरः। इति जटाधरः॥

श्वेतसुरसा, स्त्री, (श्वेता सुरसा।) शुक्लशेफालिका। इत्यमरः॥

श्वेतस्पन्दा, स्त्री, अपराजिता। इति राजनिर्घण्टः॥

श्वेतहयः, पुं, (श्वेतो हयः।) इन्द्राश्वः। इति त्रिकाण्डशेषः॥ (श्वेतो हयो यस्य।) अर्ज्जुनः। इति हेमचन्द्रः॥ (यथा, महाभारते।७।२७।३।
"ततः श्वेतहयः कृष्णमब्रवीदजितञ्जयः।
एष मां भ्रातृभिः सार्द्धं सुशर्म्माह्वयतेऽच्युत!॥")
इन्द्रः। शुक्लवर्णघोटकश्च॥

श्वेतहस्ती, [न्] पुं, (श्वेतो हस्ती।) ऐरावतः। इति भूरिप्रयोगः॥ शुक्लगजश्च॥

श्वेता, स्त्री, वराटिका। काष्ठपाटला। शङ्खिनी। इति मेदिनी॥ अतिविषा। इति रत्नमाला॥ अपराजिता। श्वेतबृहती। श्वेतकण्टकारी। पाषाणभेदी। शिलावल्कला। श्वेतदूर्व्वा। वंशरोचना। स्फटी। शर्करा। वृक्षभेदः। केना इति कन्ने इति च हिन्दी भाषा। तत्पर्य्यायः। कुरिकापत्री २ पर्व्वमूला ३ अविप्रिया ४। अस्या गुणाः। अतिमधुरत्वम्। शीतलत्वम्। स्तन्यदार्ढ्यत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥

श्वेतात्रिवृत्, स्त्री, शुक्लत्रिवृता। सादा तेउड़ी इति भाषा। तत्पर्य्यायः। त्रिभण्डी २ त्रिवृता ३ त्रिपुटा ४ सर्व्वानुभूती ५ सरला ६ निशोत्तरा ७ रेचनी ८। अस्या गुणाः। रेचनत्वम्। स्वादुत्वम्। उष्णत्वम्। समीरपित्तज्वरश्लेष्मपित्तशोथोदरनाशित्वम्। रूक्षत्वञ्च। इति भावप्रकाशः।

श्वेताम्लिः, स्त्री, क्षुपविशेषः। तत्पर्य्यायः। अम्लिका २ पिष्टोड़ी ३ पिण्डिका ४। अस्या गुणाः। मधुरत्वम्। वृष्यत्वम्। पित्तनाशित्वम्। बलदातृत्वञ्च। इति राजनिर्घण्टः॥

श्वेतार्कः, पुं, (श्वेतः शुक्लवर्णः अर्कः।) शुक्लार्कवृक्षः। सादा आकन्द इति भाषा। तत्पर्य्यायः। तपनः २ श्वेतः ३ प्रतापः ४ सितार्ककः ५ शर्करापुष्पः ६ वृत्तमल्लिका ७। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। मलशोधनकारकत्वम्। मूत्रकृच्छ्राश्मशोफार्त्तिव्रणदोषविनाशनत्वञ्च। इति राजनिर्घण्टः॥

श्वेतावरः, पुं, (श्वेतं शुक्लवर्णमावृणोतीति। आ वृ + अच्।) सितावरशाकः। इति राजनिर्घण्टः॥

श्वेताह्वा, स्त्री, (श्वेता आह्वा यस्याः।) सितपाटला। इति राजनिर्घण्टः॥

श्वेतेक्षुः, पुं, (श्वेत इक्षुः।) शुक्लवर्णेक्षुः। सादा आक् इति भाषा। तत्पर्य्यायः। सितेक्षुः २ कोष्ठेक्षुः ३ वंशपत्रकः ४ सुवेशः ५ पाण्डुरेक्षुः ६। अस्य गुणाः। कठिनत्वम्। रुच्यत्वम्। गुरुत्वम्। कफमूत्रकारित्वम्। दीपनत्वम्। पित्तदाहनाशित्वम्। विपाके कोष्णत्वञ्च। इति राजनिर्घण्टः॥

श्वेतोदरः, पुं, (श्वेतं उदरं यस्य।) कुबेरः। इति त्रिकाण्डशेषः॥ (दर्व्वीकरसर्पाणामन्यतमः। यथा, सुश्रुते कल्पस्थाने ४ अध्याये।
"श्वेतोदरो महाशिरा अलगर्द्दो आशीविष इति॥") शुक्लवर्णजठरश्च॥

श्वैत्रं, क्ली, श्वित्रम्। इत्यमरटीका।

श्वैतौही, स्त्री, (श्वेतवाह + ङीष्।) इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

श्वोवसीयसं, क्ली, (वसुशब्दः प्रशस्तवाची तत ईयसुनि वसीयः। श्वः शब्द उत्तरपदार्थप्रशंसामाशीर्विषयतामाह। मयूरव्यंसकादित्वात् समासः। "श्वसो वसीयःश्रेयसः।" ५।४।८० इति अच्।) कल्याणम्। यथा,—
"श्वःश्रेयसं शुभशिवे कल्याणं श्वोवसीयसं श्रेयः।
क्षेमं भावुकभविककुशलमङ्गलभद्रमद्रशस्तानि॥"
इति हेमचन्द्रः॥
तद्वति, त्रि॥

---

# ष

ष, मूर्द्धन्यषकारः। स तु एकपञ्चाशद्वर्णान्तर्गतसप्तचत्वारिंशद्वर्णः। चतुस्त्रिंशद्व्यञ्जनान्तर्गतैकत्रिंशत्तमव्यञ्जनञ्च। अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥")
तत्पर्य्यायः।
"षः श्वेतो १ वासुदेवश्च २
पीता ३ प्राज्ञा ४ विनायकः ५।
परमेष्ठी ६ वामबाहुः ७
श्रेष्ठो ८ गर्भविमोचनः ९॥
लम्बोदरो १० यमीशश्च ११
कामधुक् १२ कामधूमकः १३।
सुश्रीः १४ उग्रा १५ वृषो १६ लज्जा १७
मकराख्यः १८ प्रियः १९ शिवः २०॥
सूर्य्यात्मा २१ जठरः २२ कोषी २३
मत्ता २४ वह्नी २५ विदारिणी २६।
कालकण्ठी २७ मध्यभिन्ना २८
गुह्यात्मा २९ मलपूः ३० शिरः ३१॥"
इति तन्त्रम्॥*॥
अपि च।
"षकारः श्वेत आख्यातो मूर्द्धन्यो वृषसंज्ञकः।
पित्तं शक्तिश्च माया च मज्जायोनिः स्वबिन्दुमत्॥"
इति मन्त्राभिधानम्॥
अस्य स्वरूपं यथा,—
"षकारं शृणु चार्व्वङ्गि! अष्टकोणमयं सदा।
रक्तचन्द्रप्रतीकाशं स्वयं परमकुण्डली॥
चतुर्व्वर्गमयं वर्णं सुधानिर्म्मितविग्रहम्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
रजःसत्त्वतमोयुक्तं त्रिशक्तिसहितं सदा।
त्रिबिन्दुसहितं वर्णं आत्मादितत्त्वसंयुतम्॥
सर्व्वदेवमयं वर्णं हृदि भावय पार्व्वति॥"
इति कामधेनुतन्त्रम्॥
अस्य लेखनप्रकारो यथा,—
"चतुष्कोणात्मिका रेखा वामदक्षिणतः क्रमात्
वह्नीन्द्रविष्णवस्तासु तिष्ठन्ति क्रमतः सदा॥
ऊर्द्ध्वमात्रा शक्तिरूपा महालक्ष्मीसमा स्मृता।
मात्रा मध्यगता या तु वाग्देवी सा परा स्मृता॥"
अस्य ध्यानं यथा,—
"चतुर्भुजां चकोराक्षीं चारुचन्दनचर्च्चिताम्।
शुक्लवर्णां त्रिनयनां वरदाञ्च शुचिस्मिताम्॥
रत्नालङ्कारभूषाढ्यां श्वेतमाल्योपशोभिताम्।
देववृन्दैरभिवन्द्यां सेवितां मोक्षकाङ्क्षिभिः॥
एवं ध्यात्वा षकारन्तु तन्मन्त्रं दशधा जपेत्॥"
इति च वर्णोद्धारतन्त्रम्॥
(धात्वनुबन्धविशेषः। यथा, कविकल्पद्रुमे।
"षिः कुटादिः षः क्वदङ्वान् ञो ज्वादौ र वैदिकः॥"
"आख्यातिकस्याङोऽप्राप्त्यर्थं क्वदिति विशेषणम्। ष्वसते तूभयत्र ङ एव। डु ञौ ष पच पाके। सौषिध्वित्तीति पचा।" इति तट्टीका॥)

षः, पुं, कचः। इति मेदिनी॥ मानवः। स्वर्गः। श्रेष्ठः। गर्भविमोचनः। इति कश्चिदेकाक्षरकोषः॥

षः, त्रि, विज्ञः। श्रेष्ठः। इति मेदिनी॥

षग, श म स्थगने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, सिषगयिषति। श, असषगीत्। इति दुर्गादासः॥

षघ,न हिंसे। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-सेट्।) न, सघ्नोति। असघीत्। इति दुर्गादासः॥